# Shri Hanumana Stotram

# શ્રીહનુમાનસ્તોત્રમ્

## Document Information

Text title : Shri Hanumana Stotram

File name : hanumAnastotram.itx

Category : hanumaana, svAminArAyaNa, stotra, aShTaka

Location : doc_hanumaana

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીહનુમાનસ્તોત્રમ્

નીતિપ્રવીણ ! નિગમાગમશાસ્ત્રબુદ્ધે !
રાજાધિરાજ રઘુનાયક મન્ત્રીવર્ય ! ।
સિન્દૂરચર્ચિતકલેવર નૈષ્ઠિકેન્દ્ર !
શ્રી રામદૂત ! હનુમન્ ! હર સઙ્કટં મે ॥ ૧॥

સીતાનિમિત્તજરઘૂત્તમભૂરિકષ્ટ
પ્રોત્સારણૈકકસહાય ! હતાસ્રપૌઘ ! ।
નિર્દગ્ધયાતુપતિહાટકરાજધાને !
શ્રી રામદૂત ! હનુમન્ ! હર સઙ્કટં મે ॥ ૨॥

દુર્વાર્યરાવણવિસર્જિતશક્તિઘાત
કણ્ઠાસુલક્ષ્મણસુખાહૃતજીવવલ્લે ! ।
દ્રોણાચલાનયનનન્દિતરામપક્ષ !
શ્રી રામદૂત ! હનુમન્ ! હર સઙ્કટં મે ॥ ૩॥

રામાગમોક્તિતરિતારિતબન્ધ્વયોગ
દુઃખાબ્ધિમગ્નભરતાર્પિતપારિબર્હ ! ।
રામાઙ્ઘ્રીપદ્મમધુપીભવદન્તરાત્મન્ !
શ્રી રામદૂત ! હનુમન્ ! હર સઙ્કટં મે ॥ ૪॥

વાતાત્મકેસરિમહાકપિરાટતદીય
ભાર્યાઞ્જનીપુરૂતપઃફલપુત્રભાવ ! ।
તાર્ક્ષ્યોપમોચિતવપુર્બલતીવ્રવેગ !
શ્રી રામદૂત ! હનુમન્ ! હર સઙ્કટં મે ॥ ૫॥

નાનાભિચારિકવિસૃષ્ટસવીરકૃત્યા
વિદ્રાવણારુણસમીક્ષણદુઃપ્રધર્ષ્ય ! ।
રોગઘ્નસત્સુતદવિત્તદમન્ત્રજાપ !
શ્રી રામદૂત ! હનુમન્ ! હર સઙ્કટં મે ॥ ૬॥

યન્નામધેયપદકશ્રુતિમાત્રતોઽપિ
યેબ્રહ્મરાક્ષસપિશાચગણાશ્ચ ભૂતાઃ ।
તે મારિકાશ્ચ સભયં હ્યપયાન્તિ સ ત્વં !
શ્રી રામદૂત ! હનુમન્ ! હર સઙ્કટં મે ॥ ૭॥

ત્વં ભક્તમાનસસ મીપ્સિતપૂર્તિશક્તો
દીનસ્ય દુર્મદસપત્નભયાર્તિભાજઃ ।
ઇષ્ટં મમાપિ પરિપૂરય પૂર્ણકામ !
શ્રી રામદૂત ! હનુમન્ ! હર સઙ્કટં મે ॥ ૮॥

ઇતિ શ્રીહનુમાનસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Hanumana Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*